[A]आज्ञापना-ज्ञपना, जिज्ञपयिषा-ज्ञीप्सा, जिज्ञासा, जाज्ञा; ज्ञानम्, ज्ञापनम्-ज्ञपनम्, जिज्ञपयिषणम्-ज्ञीप्सनम्, जिज्ञासनम्, जाज्ञायनम्;
ज्ञात्वा, ज्ञापयित्वा-ज्ञपयित्वा, जिज्ञपयिषित्वा-ज्ञीप्सित्वा, जिज्ञासित्वा, जाज्ञायित्वा;
विज्ञाय, अनुज्ञाप्य-[1]अनुज्ञपय्य, प्रजिज्ञपयिष्य-प्रज्ञीप्स्य; प्रजिज्ञास्य, प्रजाज्ञाय्य;
ज्ञायम् २, ज्ञात्वा २, } ज्ञापम् २-[2]ज्ञपम् २-ज्ञापम् २, ज्ञापयित्वा २-ज्ञपयित्वा २, } जिज्ञपयिषम् २, जिज्ञपयिषित्वा २,
ज्ञीप्सम् २, ज्ञीप्सित्वा २, } जिज्ञासम् २, जिज्ञासित्वा २, } जाज्ञायम् २; जाज्ञायित्वा २. }

(626) "**ज्ञा नियोगे**" (X-चुरादिः-1733. सक. सेट्. उभ.)

स्वभावादयं धातुराङ्पूर्वः। **नियोगः** = प्रेरणम्।

'जानातीति श्नि सिध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेः
णौ[चौ], मित्त्वेऽपीदमेव ज्ञपनमिति [ज्ञप मिदिति] पदं ज्ञापने मारणादौ।
तेनार्थज्ज्ञापनेऽर्थे ज्ञपयतिपदवत्—ज्ञापयेदित्यपि स्यात्;
उक्तस्योक्तिः—'णिचश्च' (1-3-74) त्युदितविहतये; ज्ञापयेत्—
'ज्ञा नियोगे' ॥' (श्लो. 8) इति देवः।

आज्ञापकः-पिका,[A] आज्ञापनम्, इत्यादीनि सर्वाण्यपि रूपाणि मारणाद्यतिरिक्तार्थस्य ज्ञाधातोः (625) ण्यन्ते यानि प्रदर्शितानि तान्येवात्रापि बोध्यानि। ण्यन्तात् सनि तु इमानि रूपाणीति विशेषः। आजिज्ञापयिषकः-षिका, आजिज्ञापयिषिता-त्री, आजिज्ञापयिषन्-न्ती, आजिज्ञापयिषिष्यन्-न्ती-ती; आजिज्ञापयिषमाणः, अजिज्ञापयिषिष्यमाणः; आजिज्ञापयिट्-यिषौ-यिषः; आजिज्ञापयिषितः-तवान्, आजिज्ञापयिषुः, आजिज्ञापयिषितव्यम्, आजि-

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति मित्पक्षे ण्यन्तात्ल्यपि णेरयादेशः।
2. मित्त्वपक्षे ण्यन्ताण्णमुलि 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति दीर्घविकल्पः।

A. 'आज्ञापनामिह विभाज्य नृपेण दृष्टौ
तौ इन्धनाय समयातयतां नियुद्धम् ॥' धा. का. 3 40.